दिनाङ्क :- 13.09.2026

प्रात: - 06:55

## नवदेहली-घोषणाम्

ब्रिक्स्-देशाः ह्यः नवदिल्ल्याः भारतमण्डपम् इत्यत्र शिखरसम्मेलनस्य प्रथमे दिवसे नवदेहली-घोषणाम् अङ्गीकृतवन्तः। घोषणापत्रे दृढतर-बहुपक्षवादस्य, गहनतर-सहकारस्य च प्रतिबद्धतायाः आह्वानम् अस्ति, सुदृढ-आर्थिक-विकासात्मक-सहकारस्य उपरि बलं प्रदत्तम् अस्ति, तथा च वैश्विक-विषयेषु निर्णयप्रक्रियायां विकासशील-देशानां महत्तर-प्रभावस्य कृते अन्ताराष्ट्रिय-व्यवस्थायाः समर्थनम् अस्ति। नवदिल्ली-घोषणायाः स्वीकरणानन्तरं प्रधानमन्त्री नरेन्द्रमोदी स्वस्य समापन-भाषणे उक्तवान् यत् एतत् सदस्यराष्ट्राणां सहभागित्व-संकल्पाय स्पष्ट-दिशां प्रददाति। सः अग्रे अवदत् यत् अधुना एतेषां संकल्पानां मूर्त-परिणामेषु परिवर्तनं तेषां संयुक्त-दायित्वम् अस्ति।

## ब्रिक्स्-सम्मेलनस्य द्वितीयः दिवसः

अद्य ब्रिक्स्-शिखर-सम्मेलनस्य द्वितीयः अन्तिमः च दिवसः अस्ति। नवदिल्ल्याः भारतमण्डपम् इत्यत्र ह्यः द्विदिवसीयं शिखरसम्मेलनं प्रारब्धम्। ब्रिक्स्-देशाः शिखरसम्मेलनस्य प्रथमे दिवसे एव षड्विंशत्यधिक द्विसहस्रतमवर्षस्य नवदिल्ली-घोषणाः अङ्गीकृतवन्तः। ब्रिक्स्-देशाः संवादस्य, परामर्शस्य, कूटनीतेः च माध्यमेन अन्ताराष्ट्रियविवादानां शान्तियुतसमाधानाय स्वप्रतिबद्धतां प्रकटितवन्तः। पश्चिम-एशियादेशे निरन्तरं वर्धमानस्य समाह्वानस्य विषये अपि नेतारः चिन्तां प्रकटितवन्तः। ते च गतवर्षस्य अप्रैल्-मासस्य द्वाविंशति दिनाङ्के जम्मू-कश्मीर-प्रदेशे आतङ्क्याक्रमणस्य दृढतया निन्दाम् अकुर्वन्, तथा च आतङ्कवादस्य विरुद्धं युद्धस्य स्वप्रतिबद्धता पुनः दृढीकृतवन्तः। इतोप्यवधेयं यत् भारतं चतुर्थवारं शिखरसम्मेलनम् आयोजयति।

## ब्रिक्स्-सांस्कृतिकप्रदर्शनम्

गतसायङ्काले नवदिल्ल्याः भारतमण्डपम् इत्यत्र प्रधानमन्त्रिणा आयोजिते ब्रिक्स्-नेतृणां शिखरसम्मेलने गाला-डिनर् इत्यस्मिन्, नवरसः-द युनिवर्स् आफ् शेयर्ड्-इमोशन्स् इति विशिष्टं सांस्कृतिकप्रदर्शनम् आयोजितम्। अस्मिन् सांस्कृतिक-कार्यक्रमे ब्रिक्स्-सिम्फ़नी-वन्-रिदम्, मेनी-कल्चर्स् इत्येतानि आसन्, येन ब्रिक्स्-सदस्यानां, सहभागि-देशानां च सङ्गीतज्ञाः अद्वितीयं सहयोगात्मक-सङ्गीत-प्रदर्शनं कृतवन्तः। सिम्फ़नी इत्यस्मिन् ब्रिक्स्-देशानाम् विभिन्नानि वाद्ययन्त्राणि प्रदर्शितानि, तथा च सङ्गीतस्य भारतस्य शास्त्रीय-नृत्यपरम्पराणां च समन्वयः दृष्टः।

**<u>प्रधानमन्त्री-द्वैपाक्षिकोपवेशनम्</u>**

प्रधानमन्त्रिणा नरेन्द्रमोदिना चीनदेशस्य राष्ट्रपतिना षी चिनफिंग इत्यनेन च पुनः दृढीकृतं यत् भारत-चीनदेशौ स्वसम्बन्धेषु सामरिकं दीर्घकालिकं च परिप्रेक्ष्यं स्वीकरिष्यतः, भिन्नाभिप्रायाः विवादरूपेण न भवेयुः इति। ब्रिक्स्-शिखरसम्मेलनावधौ द्वैपाक्षिकोपवेशने, गतवर्षस्य अगस्त-मासे तियानजिन्-नगरे उभयोः अन्तिमोपवेशनानन्तरं भारत-चीन-द्वैपाक्षिकसम्बन्धेषु निरन्तरं प्रगतिः अभवत् इति स्वीकृतवन्तौ। उभौ पक्षौ परस्पर-सम्मानेन, परस्पर-संवेदनशीलतया, परस्पर-हितेन च त्रिभिः पारस्परिकैः मार्गदर्शकाः भवेयुः इति प्रधानमन्त्रिणा श्रीमोदिना अधोरेखितम्।

**<u>सीतारामनः ए. आई. आई. बी.</u>**

केन्द्रीय-वित्त-मन्त्री निर्मला सीतारामनः ए. आई. आई. बी. इति भारत-एशियन्-इन्फ़्रास्ट्रक्चर-इन्वेस्ट्मेन्ट्-बैङ्क् सहभागितां इतोऽपि सुदृढं कर्तुं अवसरेषु चर्चितवती। वित्तमन्त्रिणा नवदिल्ल्याम् एशियन्-इन्फ़्रास्ट्रक्चर्-इन्वेस्ट्मेण्ट्-बैङ्क् इत्यस्य अध्यक्षं जू जियायी इत्येतं मिलितवती। सामाजिकान्तर्जालीये पटले वित्तमन्त्रालयः अवदत् यत्, भारतस्य मूलसौकर्याणां परिवहन-सम्पर्कस्य प्राथमिकतां समर्थयितुं, स्थानीय-मुद्रा-वित्तपोषणस्य वर्धनम्, निजीक्षेत्रस्य सहभागितायाः संवर्धनम्, ए. आई. आई. बी. इत्यस्य वैश्विक-उपस्थित्यादि विषयेषु च चर्चा जाता।